NWNY2FP

# सङ्कलनात्मकं मूल्याङ्कनम् - I (2014-15)

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - दशमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् - **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् - **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् - **35 अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वाप्रश्नानाम् उत्तराणि लिखत।** 10

संसारे कः अपि मानवः न अस्ति यस्य मनसि स्वदेशं प्रतिप्रेम नास्ति। यस्मिन् देशे-स्थाने मानवो जन्म लभते, यस्मिन् च वृद्धिं गच्छति तस्मिन् तस्य आसक्तिः स्वाभाविकी। न केवलं मानवस्य प्रत्युत प्राणिमात्रस्य स्वजन्मस्थानं प्रति, मातृभूमिं प्रतिप्राणेभ्यः अपि अधिकः अनुरागःभवति। पशवःपक्षिणः च अपिस्वमातृभूमिं स्नेहेनपश्यन्ति गौरवं च अनुभवन्ति। स्वीयेषु नीडेषु भवति तेषां परमः स्नेहः। पशवः सर्वदिनं बहिः विचरणं कृत्वा सायंकाले स्वकीयं स्थानं स्वयमेव प्रत्यागच्छन्ति।

**प्रश्नाः**(2 + 2 + 4 + 2 =10)

**I. एकपदेन उत्तरत।**

(i) मानवस्य मनसि कं प्रतिप्रेम भवति?

(ii) केषु पक्षिणां स्नेहःभवति?

**II.** **पूर्णवाक्येन उत्तरत।**

(i) सर्वेषां अनुराग: कं कं प्रतिभवति?

(ii) पशव: सर्वंदिनं बहि: भ्रमित्वा कुत्र प्रत्यागच्छन्ति?

**III.** **प्रदत्तविकल्पेभ्य: उचितम् उत्तरं निर्देशानुसारम् चित्वा लिखत।**

(i) 'मानव:' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम्?

(अ) नास्ति (ब) अस्ति

(स) गच्छति (द) भवति

(ii) 'विराग:' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(अ) अनुराग: (ब) प्राणेभ्य:

(स) सुराग (द) अननुराग

(iii) 'नीडेषु' अस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(अ) आसक्ति (ब) स्वाभाविकी

(स) स्वीयेषु (द) परम: स्नेह:

(iv) 'तेषां परमं स्नेह:' अत्र 'तेषाम्' इति सर्वनामपदं केभ्य: प्रयुक्तम्?

(अ) पशुभ्य: (ब) पक्षिभ्य:

(स) मानवेभ्य: (द) देशाय

**IV.** **अस्य अनुच्छेदस्य कृते एकम् उपयुक्तं शीर्षकं लिखत।**

## खण्ड: 'ख'

## रचनात्मकं-कार्यम् – ( 15 अङ्का: )

2 **भवती चान्दिनी अस्ति। भवत्या: अनुज: पठने उत्सुक: नास्ति। तं प्रेरयितुं लिखिते पत्रे रिक्तस्थानानि मञ्जूषापदसहायतया पूरयत –** 5

शारदा छात्रावास:,

नवदेहली,

तिथि: --------

प्रिय अनुज!

आशिष:!

ह्य: पितु: पत्रं ___(i)___ । पत्रात् अधिगतं यत् त्वम् अधिकाधितं समयं मुखपुस्तके (facefoob) एव व्यर्थं ___(ii)___ इति। एतेन पठने तव कुशलता ___(iii)___ अभवत्। सर्वासु अपि परीक्षासु तव ___(iv)___ न उत्तमा:। खेलने अपि तव ___(v)___ न्यूना अभवत्।

अनुज! एष: एव काल: ___(vi)___ योग्य:। अत: प्रात: उत्थाय पठ। सायं च ___(vii)___ क्रीड। एतेन त्वं स्वस्थ: ___(viii)___ । पठने पुन: प्रथमं स्थानमपि लप्स्यसे। आशासे यत् आगामि परीक्षायां तव अङ्का: ___(ix)___ भविष्यन्ति।

| | | | |
|---|---|---|---|
| | | मातापितृभ्यां __(x)__ ।<br>तव प्रियभगिनी<br>चान्दिनी<br><br>**मञ्जूषा**<br>अङ्का:, नमः, क्रीडाक्षेत्रे, विद्याध्ययनाय, श्रेष्ठाः, करोषि, प्राप्तम्, अभिरुचिः, भविष्यसि, न्यूना | |
| | 3 | **चित्रं दृष्ट्वा प्रदत्तपदानां सहायतया चित्रस्य वर्णनम् पञ्चसंस्कृतवाक्येषु कुरुत** –<br><br>**मञ्जूषा**<br>हरिद्वारे, तीर्थम्, गंगायाः, ध्वजाः, स्नानं, मन्दिराणि, शिखरेषु, पूजां, कीर्तनम्, दीप्तम्, पुष्पम्, अर्चनाम् | 10 |
| | | **अथवा** | |
| | | **'निर्धनः कृषकः' इति विषयम् अधिकृत्य पञ्चवाक्यानि लिखत।**<br>**मञ्जूषा**<br>निर्धनः, कृषकः, लघुक्षेत्रम्, द्वाभ्याम् वृषभाभ्याम्, अत्यधिकम्, परिश्रमम्, बीजवपनम्, यदा, तदा, वृष्टिः, करोति, हलम्, कर्षति, आतपे, सहते, भवति, कष्टानि, शस्यम्, अल्पम् | 10 |
| | | **खण्डः 'ग'** | |

| | | | |
|---|---|---|---|
| | | **अनुप्रयुक्त व्याकरणम् – ( 30 अङ्काः )** | |
| 4 | | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितंसन्धिं विच्छेदं वा लिखत।**<br>(i) देवर्षिः नारदः पूजनीयः।<br>(ii) कालिदासः कवि + इन्द्रः आसीत्।<br>(iii) किम् + कुलेन विशालेन विद्याहीनेन जन्तुना।<br>(iv) महात्मनः सर्वेषां कल्याणम् इच्छन्ति, कः तच्छत्रुः।<br>(v) वेदानां सामवेदः + अस्मि। | 5 |
| 5 | | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।**<br>(i) सत्यमेव जयते न अनृतम्।<br>(अ) न अनृतम् (ब) न नृतम्<br>(स) न ऋतम् (द) ऋतम्<br>(ii) कुन्तीसुताः वनवासाय अगच्छन्।<br>(अ) कुन्त्याः सुताः (ब) कुन्ती च सुताः च<br>(स) कुन्ती सुतानाम् (द) कुन्तीसुतायै<br>(iii) चतुर्युगम् कृतयुगात् आरभते।<br>(अ) चत्वारि युगानि (ब) चतुर्णां युगानां समाहारः<br>(स) चत्वारः युगाः (द) चतस्रः युगाः<br>(iv) त्रिपथम् दृष्ट्वा सम्भ्रान्ता अस्मि।<br>(अ) त्रयाणां पथां समाहारः (ब) त्रयाणां पथाः<br>(स) तिसृणां पथां समाहारः (द) त्रीणि पथानि<br>(v) शीतलसलिलम् एव पेयम्।<br>(अ) शीतला सलिलम् (ब) शीतलम् सलिलम्<br>(स) शीतलं सलिले (द) शीतले सलिले<br>(vi) उत्तमाः भोज्यपदार्थाः एव खादितव्याः।<br>(अ) भोज्यानि पदार्थाः (ब) भोज्यपदार्थान्<br>(स) भोज्यैः पदार्थाः (द) भोज्याः पदार्थाः | 6 |
| 6 | | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत।**<br>(i) कर्मयोगी नरः संसारे दुर्लभः।<br>(ii) लीलावान् कृष्णः गोपिकाभ्यः रोचते।<br>(iii) ईशवन्दना हृद्+ठक् आनन्दं प्रददाति।<br>(iv) मालाकारेण पुष्पाणि न त्रुट्+अनीयर्।<br>(v) सैनिकैः निरस्त्रः न हन्तव्यः। | 5 |

| | | |
|---|---|---|
| 7 | **प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत –**<br>(i) ___________हरिश्चन्द्रः नाम राजा आसीत्।<br>(ii) सः प्राणपणेन___________सत्यं पालयति स्म।<br>(iii) सत्यं ___________सः किमपि न वदति स्म।<br>(iv) हरिश्चन्द्रः___________ सत्यवादी न कोऽपि भूतः न भविष्यति<br>(v) ___________अपि सः सर्वैः स्मरणीयः।<br>**मञ्जूषा**<br>अधुना, इव, पुरा, विना, अपि, | 5 |
| 8 | **अधोलिखिते संवादे रिक्तस्थानानि वाच्यानुसारं उचितपदेन पूरयत।**<br>(i) इन्द्रः – त्वम् अत्र किं पश्यसि?<br>वरुणः – अत्र मया जन्तुशाला ___________।<br>(ii) इन्द्रः – जन्तुशालायाम् कं पशुं पश्यसि?<br>वरुणः – अत्र ___________सिंहः दृश्यते।<br>(iii) इन्द्रः – किं त्वया खगाः अपि दृश्यन्ते।<br>वरुणः – आम् अहम् _________अपि पश्यामि।<br>(iv) पिता – पुत्र! किं त्वं लेखम् लिखसि?<br>पुत्रः – आम् मया _________लिख्यते।<br>(v) पिता – किं कविता कविताम् अपि रचयति?<br>पुत्रः – नैव _________कविता तु न रच्यते। | 5 |
| 9 | **अधोलिखितेषु वाक्येषु अङ्कानां स्थाने संस्कृतपदानि लिखत।**<br>(i) विद्यालयस्य वार्षिकः कार्यक्रमः <u>5.00</u> वादने दीपप्रज्वालनेन प्रारप्स्यते।<br>(ii) <u>5.45</u> वादने मुख्यातिथिना पुरस्कारः वितरणम् भविष्यति।<br>(iii) <u>6.15</u> वादने सांस्कृतिकः कार्यक्रमः भविष्यति।<br>(iv) सायं <u>7.30</u> वादने मुख्यातिथेः भाषणम् भविष्यति। | 4 |
| | **खण्ड : 'घ'**<br>**पठित-अवबोधनम् - 35 अङ्काः** | |
| 10 | यूथपतेः वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन् – 'भो! किमिदमुच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः।'<br>**I. एकपदेन उत्तरत।**<br>(i) कपयः कीदृशाः आसन्? | 5 |

(ii) कस्य वचनम् अश्रद्धेयं मत्वा कपय: अहसन्?

**II. पूर्णवाक्येन उत्तरत।**

कपय: प्रहस्य किम् अवदन्?

**III. अधोदत्तप्रश्नयो: उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत –**

(i) अत्र 'वयम्' इति सर्वनामपदं केभ्य: प्रयुक्तम्?

(अ) मदोद्धतेभ्य: (ब) कपिभ्य:

(स) यूथपतये (द) मेषाय

(ii) भक्षयिष्याम: – इति क्रियापदस्य कर्तृपदं किम्?

(अ) न (ब) वयम्

(स) कषाय (द) अटव्याम्

11 **अधोलिखितं श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत –** 5

भगवन्किमुपादेयम्? गरुवचनम्, हेयमपि च किम्? अकार्यम्।
को गुरु:? अधिगततत्त्व: शिष्यहितायोद्यत: सततम्।।

**I. एकपदेन उत्तरत।**

(i) गुरुवचनं कीदृशं भवति?

(ii) हेयं किं भवति?

**II. पूर्णवाक्येन उत्तरत।**

लोके क: गुरु: अस्ति?

**III. निर्देशानुसारम् उत्तरत –**

(i) श्लोके 'करणीयम्' इति पदस्य क: विलोम: प्रयुक्त:?

(अ) अकार्यम् (ब) सततम्

(स) हेयम् (द) उद्यत:

(ii) 'सर्वदा' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(अ) उद्यत: (ब) गुरु:

(स) अधिगततत्त्व: (द) सततम्

12 **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।** 5

राजा – 'हा! दग्धा: मे घोटका: कथं रक्षणीया: सपदि उपाय: क्रियताम्।'

राजवैद्य: – अश्वानां वह्नि-दाह-समुद्भव: दोष: कपीनां मेदसा नाशम् अभ्येति यथा सूर्योदये तम:।

राजा – यथोचितं क्रियताम्। (इति राजदेशं श्रुत्वा सर्वे भयत्रस्ता: कपय: अचिन्तयन्)

कुपय: – हा! हता: वयम्। अवधीरिता: अस्माभि: गुरुजनोपदेशा:।

**I.** **एकपदेन उत्तरत।**

(i) वानरैः केषाम् उपदेशाः न तिरस्करणीयाः आसन्?

(ii) के दग्धाः?

**II.** **पूर्णवाक्येन उत्तरत।**

कपीनां मेदसा कः नाशम् अभ्येति?

**III.** **निर्देशानुसारं शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत।**

(i) 'शीघ्रम्' इति अर्थे कः शब्दः प्रयुक्तः?

(अ) यथोचितम् (ब) कथम्

(स) श्रुत्वा (द) सपदि

(ii) 'सर्वे' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

(अ) भयत्रस्तेभ्यः (ब) घोटकेभ्यः

(स) कपिभ्यः (द) राजवैद्येभ्यः

---

13 **मञ्जूषातः उचितपदानि चित्वा अधोलिखितश्लोकयोः भावार्थं पूरयत।** 4

**I.** किं मरणम्? मूर्खत्वम्, किं चानर्धम्? यदवसरे दत्तम्।
आमरणात्किं शल्यम्? प्रच्छन्नं यत्कृतं पापम्।।

**भावार्थं** – संसारे जनानां ___(i)___ एव तेषां मरणम् भवति, एवम् एव उचिते समये दानमेव __(ii)__ भवितुम् शक्नोति। जनाः यत् पापं प्रच्छन्नरूपेण ___(iii)___ तत् एव ___(iv)___ तान् कण्टकमिव पीडयति।

**II.** अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।।

**भावार्थं** – हे देवि सरस्वति! तव अयं __(v)__ अदभुतः एव अस्ति। यदा वयम् अस्य __(vi)__ कुर्मः तदा एषः __(vii)__ यदा च वयम् __(viii)__ कुर्मः तदा नाशं प्राप्नोति।

**मञ्जूषा**

मृत्युपर्यन्तं, मूर्खता, लाभदायकं, कुर्वन्ति, कोशः, वर्धते, सञ्चयं, व्ययं

---

14 **मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत।** 4

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥

**अन्वय** – भारति तव ___(1)___ कोशः ___(2)___ अपि अपूर्वः ___(3)___ व्ययतः वृद्धिम् आयाति __(4)__ क्षयम् आयाति।

**मञ्जूषा**

अयम्, विद्यते, सञ्चयात्, कः

---

15 **वाक्येषु रेखांकितपदानां स्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत –** 4

(i) कामः क्रोधः च <u>महाभक्षकौ महापापिनौ</u> च स्तः।

(ii) कामक्रोधादिभ्यः <u>वेगस्य</u> उत्पत्तिः भवति।

| | | | |
|---|---|---|---|
| | | (iii) स्मृतिभ्रंशात् बुद्धिनाशः भवति।<br>(iv) सम्मोहात् स्मृतिभ्रंशः भवति। | |
| | 16 | **अधोलिखितवाक्यानि घटनाक्रमेण पुनः लेखनीयानि।**<br>(i) तं कलहम् अवेक्ष्य यूथपतिः अवदत्।<br>(ii) वानराः प्रहस्य अवदन्।<br>(iii) न वयं स्वर्गसमानोपभोगान् त्यक्ष्यामः।<br>(iv) वयं वनं गत्वा कटुरूक्षफलानि न खादिष्यामः।<br>(v) मेषस्य सूपकाराणां मध्ये कलहः भवति स्म।<br>(vi) भोः! एतत् राजभवनं त्यजत।<br>(vii) भोः किमिदम् उच्यते?<br>(viii) वानरयूथपतिः वनं गतः। | 4 |
| | 17 | **रेखाङ्कितपदानां प्रसंगानुसारम् उचितम् अर्थं चित्वा लिखत** –<br>(i) दग्धां हयशालां विज्ञाय राजा अपृच्छत्।<br>(अ) अश्वशालां (ब) मेषशालां<br>(स) वानरशालाम् (द) पाठशालां<br>(ii) कपीनां मेदसा दोषो नाशम् अभ्येति।<br>(अ) नश्यति (ब) आगच्छति<br>(स) प्राप्नोति (द) स्वीकरोति<br>(iii) मेषः महानसं प्रविश्य यद् पश्यति तद् खादति।<br>(अ) महापापम् (ब) मानसरोवरम्<br>(स) पाकशालाम् (द) गुहाम्<br>(iv) अवधीरिताः अस्माभिः गुरुजनोपदेशाः।<br>(अ) पालिताः (ब) विचारिताः<br>(स) तिरस्कृताः (द) स्वीकृताः | 4 |
| | | | |
| | | | |